ललना, स्त्री, ( ललयति ईप्सति कामानिति । लल+ल्युः । टाप् । ) कामिनी । ( यथा, कलाविलासे । १ । ५ ।

"रतिलुलित ललित ललनाक्षमजल लववाहिन सुहुर्यन्त्र ।
अथ केशकुसुम परिमल वासितदेहा वहन्त्यनिलाः ॥" )

नारीभेदः । जिह्वा । इति मेदिनी । ने, १२१ ॥

ललनाप्रियं, क्ली, ( ललनानां प्रियम् । ) ह्रीवेरम् । इति राजनिर्घण्टः ॥

ललनाप्रियः, पुं, ( ललनानां प्रियः । ) कदम्बः । इति राजनिर्घण्टः ॥ कामिनीवल्लभश्च ॥

ललन्तिका, स्त्री, ( ललन्त्येव । स्वार्थे कन् । ) नाभिलम्बकण्ठिकादिः । तत्पर्य्यायः । लम्बनम् २ । इत्यमरः ॥ गोधा । इति शब्दमाला ॥

ललाकः, पुं, मेहनम् । इति शब्दचन्द्रिका ।

ललाटं, क्ली, ( ललं ईप्सामटति प्रापयतीति । अट्+अण् । ) अवयवविशेषः । कपाल इति ख्यातम् । तत्पर्य्यायः । अलिकम् २ गोधिः ३ । इत्यमरः ॥ महाशङ्खः ४ शङ्खः ५ भालः ६ कपालकः ७ अलीकम् ८ । इति शब्दरत्नावली ॥ ललाटकम् ९ । इति धनञ्जयः ॥ तस्य शुभाशुभलक्षणम् । यथा,—

"उन्नतैर्विपुलैः शङ्खैर्ललाटैर्विषमैस्तथा ।
निर्द्धना धनवन्तश्च अर्द्धेन्दुसदृशैर्नराः ॥
आचार्य्याः शुक्तिविशालैः शिरालैः पापकारिणः ।
उन्नताभिः शिराभिस्तु स्वस्तिकाभिर्धनेश्वराः ॥
निम्नैर्ललाटैर्वधार्हाः क्रूरकर्म्मरतास्तथा ।
संवृतैश्च ललाटैश्च कृपणा उन्नतैर्नृपाः ॥
ललाटोपस्थितास्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः ।
केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत् ॥
पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्बहुभिस्तथा ।
चत्वारिंशच्च वक्राभिस्त्रिंशद्भ्रूलग्नगामिभिः ॥
विंशतिश्चामवक्राभिरायुः क्षुद्राभिरल्पकम् ।
न पृथु बालेन्दुनिभे भ्रुवौ चाथ ललाटकम् ॥
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम् ॥"
इति गारुडे ६५ अध्यायः ॥

("अतःपरं प्रत्यङ्गानि वक्ष्यन्ते । मस्तकोदरपृष्ठनाभिललाटनासाचिवुकवस्तिग्रीवा इत्येता एकैकाः ।" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

ललाटकं, क्ली, ( ललाटमेव । कन् । ) प्रशस्तललाटम् । इति शब्दरत्नावली ॥ ललाटमात्रम् । इति धनञ्जयः ॥

ललाटन्तपः, त्रि, ( ललाटं तपतीति । ललाट+तप+"असूर्य्यललाटयोर्दृशितपोः ।" ३ । २ । ३६ । इति खश् । मुम् । ) ललाटतापकः । "ललाटन्तपः सूर्य्यः ।" इति सिद्धान्तकौमुदी ॥ (यथा, रघुः । १३ । ४१ ।

"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥"

यथा च, नैषधे । १ । १३८ ।

"कथं विधातर्मयि पाणिपङ्कजात्
तव प्रिया शैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा ॥" )

ललाटिका, स्त्री, ( ललाटे भवोऽलङ्कारः । "कर्णललाटात् कनलङ्कारे ।" ४ । ३ । ६५ । इति कन् । ) स्वर्णादिरचितललाटाभरणम् । टिका इति ख्याता । तत्पर्य्यायः । पत्रपाश्या २ । इत्यमरः ॥ लालटस्थचन्दनम् । तत्पर्य्यायः । शङ्खचर्च्चा २ । इति शब्दरत्नावली ॥ (तिलकः । इति मल्लिनाथः ॥ यथा, कुमारे । ५ । ५५ ।

"तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥" )

ललाम, [ न् ] क्ली, ललामम् । यथाह रुद्रः ।

"प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु ।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च ॥"

( प्रधाने । यथा, रघुः । ५ । ६४ ।

"तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः ॥"

पुरुषः । इति रघुटीकायां मल्लिनाथधृतयादवः । ५ । ६४ ॥ )

ललामं, क्ली, ( लड़ विलासे+क्विप् । तं अमति प्राप्नोतीति । अम गतौ+अण् । डस्य लत्वम् । ) चिह्नम् । ध्वजः । शृङ्गम् । प्रधानम् । भूषा । ( यथा, भागवते । ३ । १४ । ४८ ।

"पौत्रस्तव श्रीललनाललामं
द्रष्टास्फुरत् कुन्तलमण्डिताननम् ॥")

बालधिः । पुण्ड्रम् । तुरङ्गः । प्रभावः । इति मेदिनी । मे, ५१ ॥ अश्वललाटे अन्यवर्णचिह्नम् । गवादीनां ललाटचित्रम् । अश्वस्य भूषा । इत्यमरटीकायां भरतः ॥ (पुंनपुंसकलिङ्गमपि । यथा,—

"ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे ।
श्रेष्ठभूषापुण्ड्रशृङ्गपुच्छचिह्नाश्वलिङ्गिषु ॥"
इति रघुटीकायां मल्लिनाथधृतयादवः ॥

रम्ये श्रेष्ठे च त्रि । यथा, महाभारते । ७ । २२ । १३ ।

"ललामैर्हरिभिर्युक्तः सर्व्वशब्दसहैर्युधि ।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्त्तत ॥")

ललामकं, क्ली, पुरोन्यस्तमाल्यम् । इत्यमरः ॥ तदेव माल्यं पुरः संमुखभागे न्यस्तं ललाटपर्य्यन्तमागतं ललामकं ललामं तिलकमिव इति इवार्थे कः । इति भरतः ॥

ललामी, स्त्री कर्णभूषणविशेषः । तत्पर्य्यायः । उत्चिप्तिका २ । इति शब्दमाला ॥

ललितं, क्ली, ( लल+क्तः । ) शृङ्गारभावजक्रियाविशेषः । इत्यमरः ॥ सुकुमारविधानेन भ्रूनेत्रादिक्रियासचिवकरचरणाङ्गविन्यासो ललितम् । तथा च ।

"सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत् ॥"

तथा,—

"सभ्रूभङ्गं करकिशलयावर्त्तनैरापतन्ती
सा लिम्पन्ती ललितललिता लोचनस्याञ्जनेन ।
विन्यस्यन्ती चरणकमले लीलया स्वैरयाते
निःशङ्का च प्रथमवयसा नर्त्तिता पङ्कजाक्षी ॥
भ्रूनेत्रादिक्रियाशालिसुकुमारविधानतः ।
हस्तपादाङ्गविन्यासस्तरुण्या ललितं विदुः ॥"
इत्यन्येऽपि ॥

"अनाचार्य्योपदिष्टं स्याल्ललितं रतिचेष्टितम् ।"
इत्यन्ये ।

ललत् केष्मे भावे क्तः । लड विलासे इत्यस्य मनीषादित्वात् डस्य लत्वं वा । इति भरतः ॥ अपि च ।

"विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा ।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम् ॥"
इत्युज्ज्वलनीलमणिः ॥

ललितः, पुं, (लल्यते ईप्स्यते इति । लल+कर्म्मणि क्तः ।) रागविशेषः । तस्य स्वरूपं यथा,—

"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽलसलोचनश्रीः ।
विनिःसरन् वासगृहात् प्रभाते
विलासिवेशो ललितः प्रदिष्टः ॥"

तस्य गानसमयो यथा,—

"प्रातर्गेयास्तु देशागो ललितः पठमञ्जरी ।
विभाषा भैरवी चैव कामोदो गोण्डकीर्य्यपि ॥"
इति सङ्गीतदामोदरः ॥

ललितः, त्रि, ( लल+क्तः । ) सुन्दरः । ( यथा, रघुः । ८ । १ ।

"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः ॥" )

ईप्सितः । इति मेदिनी । ते, १४७ ॥ चलितः । इति विश्वशब्दरत्नावल्यौ ॥

ललितकान्ता, स्त्री, (ललिता कान्ता च । ) मङ्गलचण्डिका । तस्या ध्यानं यथा,—

"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ॥"
इति तिथ्यादितत्त्वम् ॥

ललिता, स्त्री, (ललित+टाप् ।) कस्तूरी । दारी । इति राजनिर्घण्टः ॥ नदीविशेषः । यथा,—

"निमिनाम्नस्तु राजर्षेः शापाद्ब्रह्मसुतः पुरा ।
वशिष्ठो ह्यशरीरोऽभूत् शापाच्च निमिनस्तथा ॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके ।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा ॥
प्रत्यक्षस्तस्य देवस्य वरदानान्महामुनिः ।
अमृतान्यवतार्य्याशु कुण्डं कृत्वा गिरेस्तटे ।
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम् ॥
तस्मादमृतकुण्डात्तु सन्ध्या नाम नदी वरा ।